International Journal of Enhanced Research in Educational Development (IJERED), ISSN: 2320-8708
Vol. 2, Issue 1, Jan.-Feb., 2014, pp: (34-37), Available online at: www.erpublications.com

# विविध विषये रूपकाणां महत्वविवेचन सन्दर्भे अलंकारशेखरस्यावलोकनम् ( काव्यशास्त्रीय सन्दर्भे )

डॉ. देवेश कुमार मिश्र

संस्कृत विभाग, उत्तराखण्ड मुक्त विश्वविद्यालय, हल्द्वानी नैनीताल, उत्तराखण्ड

---

वस्तुत : निखिलेपि विश्वे संस्कृत साहित्यस्य श्रेष्ठतमा प्रतिष्ठा । संस्कृत साहित्यं तु विविध ज्ञान विज्ञान गुफितम् । समस्त साहित्येषु प्राचीनतादिदृष्ट्या संस्कृत साहित्यस्य व्यापकता, अभिरामता, मनोरंजकता, जनकल्याणकारिता इति श्रेष्ठतमं मन्यते । संस्कृत साहित्य द्विधा अस्ति-अलौकिकं लौकिकं चेति । अलौकिके तु वेदनां गणना, सर्वज्ञरनसम्पन्नता चास्ति-चराचर निवासिनां प्राणिनां कल्याणोपाया: वेदे विद्यन्ते । न केवलं कल्याणं अपितु सर्वाषु सामाजिकी व्यवस्थाषु उत्पन्नोत्पन्न, उत्पत्स्यमाण अखिलारिष्टानां शमनोपायाश्च विर्विवादोस्तिवेदविषये।अतेव अलौकिक प्रतिष्ठा वेदानां ।लौकिक संस्कृत साहित्ये तु समस्त काव्यसाहित्यमायाति । सकलानां कलानां ज्ञानागारं काव्यं । अस्य काव्यस्य दृयश्रव्य भेदद्वयं लक्षणकार: आचार्य विश्वनाथ: साहित्यदर्पण नामके ग्रन्थे उक्तं – दृश्य श्रव्यत्व तद्वयं द्विविधं इत्यादि ।

दृश्य काव्ये सभेदनाटकादिकम् श्रव्ये तु सर्वे काव्य ग्रन्था: काव्य प्रयोजनानां दृष्ट्या काव्यानां अतीव महत्वपूर्ण स्थानं अस्ति । तत्र दृश्यकाव्यं तु श्रेष्ठत्वं भजते । कलानां च संश्रयात् दृश्यकाव्यानां प्रतिष्ठा, तात्पर्यात् श्रव्यकाव्यनामपेक्षया । दृश्या काव्यानां महती विशिष्टता अस्ति । उक्तं हि कालिदासेन – काव्येषु नाटकं रम्यम् इत्यादि । एतत् दृश्यकाव्यात्मकं अंगं साहित्ये प्रभूत समृद्वम् अस्तीति । अत: काव्येषु नाट्यं हि नाम विशिष्टं स्थानमधिकरोति च ,परवर्तिभि : विद्ववह काव्यशास्त्रज्ञद्धि: आलंकारिकै: आचार्यै : अपि सिद्वान्त रूपेण प्रवर्तितं प्रयोजनमिति कृत्याकृत्य प्रवृत्ति निवृत्युपदेश द्वारेण नाट्यैरेव विशेषत : साध्यते । नाट्यम् तु वृत्तं प्रदर्श्य विभिनोपायेन कालात्मकत्वेन दर्शकानां पाठकानां च हृदये आह्रादं उत्पादयति, हृदयशोधनम् करोति च । नाट्य विद्या-नाट्यकला सहृदय-हृदयाह्रादकारिणी, लोकोत्तरचमत्कारकारिणी, परमानन्दप्रदयिनीमपि कथिता सदा । तत्र तु वाद्यं, नृत्यं, लोकवृत्तानुकरणं, चित्रचारूत्वं, संगीतं चादिकं च विशेषेण भ्राजन्ते । अत: नाट्यकला समस्तकालाषु सामाज्ञी जायते । नाट्यकलां किमपि अन्यद् कलां सर्वा: अपि कला: शास्ति । लोकेषु न इदृग् धर्मार्थ: क्रीडाकामादिक:, आमोदप्रमोदसमिहितमाचारो वा दृश्यते यो नाट्ये अनुकृत: निगदित:, गुम्फितो न स्यात् । विविध कर्माणि, सर्व: शिल्प समुदाय:, परं देवदैत्यादि धनिकादिनिर्धनकृपणादीनां, हासप्रियपाण्डित्यसफलदिप्रभृतिअनयान्यपदार्थनां च समीचीनतयाभिनयं, प्रदर्शनं वर्णनं च नाट्यं धारयति । नाट्यात् न परं किन्चित् यस्यद्वारेण सर्वं सुलभं भवति । नाट्यं अनागतं अतीतं अपि वृत्तं घटयितुमात्मनि शक्तिं निदधाति । मालविकाग्निमित्रे नाटके महाकवि कालिदासेन उक्तं यथा नाट्य सन्दर्भे –

**देवानामिदमामनन्ति मुनय: शान्तं क्रतुं चाक्षुषम्**
**रूद्रेणेदमुमाकृतव्यतिकरे स्वांगे विभक्तं द्विधा ।**
**त्रैगुण्योद्भवमत्रलोकचरितम् नानारसं दृश्यते ।**
**नाट्यं भिन्न रूचोर्जनस्य बहुधाप्येकंसमाराधनम्**
**( मालविकाग्निमि□त्रम् नाटके )**

अद्यावधि विज्ञान प्रभृति चिकित्सा उपकरणादि समस्त भैतिकानुसन्धानसमृद्धि समये जन सामान्यानां मनोरन्जनस्य नाट्यमेव एकमात्रसाधनम् । रूपकाणाश्रत्वात् नानाविध वास्तु-चित्र-मूर्ति संगीतादि काव्यकलाभिधा: सर्वा: अपि ललिता: कला स्वीयां शोभां वर्धयन्ति आतनोति च ।

जना: यावद् नाट्ये आनन्दं अनुभवन्ति, आप्नुवन्ति, तावद् न कथासु, न भाषणेषु, न क्रीडनकेषु अन्यान्य प्रदर्शनी-प्रतियोगिता-कविसम्मेलनमहोत्सवेषु आनन्दं न लभन्ति। नाट्यस्य प्रयोजनं हि लोकरज्जनापूर्वकं धर्मार्थकामशिक्षणम्- त्रिवर्गसाधनं नाटयम् । तत्रापित लोकरज्जनमेव मूलभूतमुद्देश्यम् । आचार्यकेशवमिश्रेण अलंकारशेखरे समर्थितमेतम् । सामान्यजनानां कृतेपि श्रव्यकाव्यापेक्षया नाटयस्याकर्षणं विशेषत: प्रभावशाली च प्रभावोत्पादको भविता तद्यथा-नाटकान्तं कवित्वम् । नाटयं हि नाम कवित्वस्य अन्तिमा सीमा अस्ति।

नाट्यस्य शब्दार्थ: किं तावत् नाटयमिति जिज्ञासायां विविधै: कोशकारै: ग्रन्थकारैश्च विविधाभि: व्युत्पत्तिभिर्नाट्य शब्दार्थो बहुधा निरूप्यते ।

**नृत्यं तु ताण्डवं लास्यं त्रितयं नाट्यमुच्यते।**

अपि च-नटानां कार्यम् नाट्यम् भवति । नटस्य इदं कार्यम् कृत्यं वा । यथा देवीभागवते नाट्यं तनोषि सगुणा विविधप्रकारम् । नो वेत्ति कोपि तव कृत्यविधानयोग्यम् ।। (देवी भागवते)

नटानां समूह : इति व्याकरणम् । ताण्डवं नटनं नाट्यं लास्यं नृत्यन्च नर्तने । तौर्यत्रिकं नृत्य – गीत – वाद्यं वाट्यमिदं त्रयम्।। नाट्यं तौर्यत्रिके लास्ये । एवं नट् धातुना 'छन्दोगौक्थिक्वहवृच् नटान्य:' इत्यनेने पाणिनिसूत्रेणन्य प्रत्यये कृति सति नाट्यशब्दस्य निष्पत्तिर्भवति ।

**प्रमुखनाट्याचार्याणां मते नाटयस्वरूपम्** –

आचार्यभरतमुनिमते – भारतीयनाट्यपरम्परा नाट्यशास्त्रकारं भरतं मुनेरूपाधिना विभूषयति स्म। तेन विरचितं नाट्यशास्त्रम् आकरग्रन्थरूपे नाट्यजगति अवतिष्ठति । ग्रन्थोयं नाट्यपरम्पराया: आदिम: अस्ति।यथा नाट्यशास्त्रे उल्लिखितमस्ति –

क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत् । (नाट्यशास्त्र)

दृश्यं हृद्यं, श्रव्यमिति व्युत्पत्तिपदं भवति। व्युत्पत्तिर्नाम प्रीतिरिति अस्ति। अत एव स्वर्गेपि हि तदा तदा मानुषगतराजसधर्माभिसम्बन्धचित्रितयागादिसरसहृदयत्वात् देवा: अपि क्रीडनीयकम् अभिलषेयुरिति इच्छन्तीति भावार्थ: ।

अत एव देवानां प्रार्थनाम् उररीकृत्य ब्रह्म चतुर्वेदाड्गसम्भवं ( सार्वजनिकं) पन्चमं वेदं नाट्यशास्त्रं नाट्यवेदं वा प्रणिनाय स वेदचतुष्टयात् नाट्यशास्त्रोपुयुक्तं तत्वचतुष्टयं जग्राह। तच्च नाट्यं कीदृशं भवेत्? प्रश्नस्यास्योत्तरे भरतमुनिना ग्रन्थेस्मिन्मुक्तम् –

नैकान्ततोत्र भवतां देवानां चानुभवनम् ।
त्रैलोक्य स्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ।। (नाट्यशास्त्र )

नाट्येस्मिन् त्रयाणां लोकानां भावानुकीर्तनं भवति । अत्रैव नाट्स्य प्रथमप्रयोगसमये विक्षुब्धान् असुरान् सान्त्वयितुम् उक्तमासीत् पितामहेन ब्रह्मणा यन्न नाट्येकेवलं देवानामधिकारोस्ति। नाट्यं दृष्ट्वा सर्वे जना: आनन्दस्याधिकारिणो भवन्त्विति भाव:। नाट्यस्यास्य प्रभाव: कस्यचित् एकाभिरूचियुक्तस्य जनस्योपरि न भवति । अपितु नाट्यिमदं सार्वजनिक मनोरन्जनकारणात् सर्वेभ्यो ग्राह्या: उपादेयश्च भवति। भरतमुनिवचनानुसारेण नाट्यमेक: सार्वजनिकश्च पन्चमो वेदोस्ति ।

सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम् ।
नाट्याख्यं पंचमं वेदं सेतिहासं करोम्यहम् ।। (नाट्यशास्त्र )

नाट्यं न केवलं प्रधानपुरूषार्थोपायदर्शकं यावत्सर्वेषां शास्त्राणां कलाप्रधानानां येर्था: गीतनृत्यवाद्यादि सहितम्। तथा सर्वाणि शिल्पानि चित्रपुस्तादीनिप्रवर्तयति। स्वोपयोगित्वेन आक्षिपति इत्येवम् एकेन यत्नेन समस्त वस्तुसिद्धिर्यतो भवति। तन्नाट्यमित्युक्तं भवति ।
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ।
लोकोपदेशजननं नाटयमेतद् भविष्यति ।। (नाट्यशास्त्र )

नाट्यमेतत् सामाजिकेभ्यो धर्मं, यशस्यमायुष्यं, हितं बुद्धि विवर्धनं लोकोपदेशजननं च प्रयच्छति। नाट्यमिदं दु:खार्तानां श्रमार्तानां तपस्विनां कृतेपि महदुपकारकम् अस्ति। यतो हि चत्वारो वेदा:, द्विजमात्रोपयोगिन: उपादेययुक्ताश्च सन्ति। नाट्येस्मिन् सर्वजन – हिताय सर्वजनसुखाय च

भावना निहितास्ति। यथा कथितमस्ति –
विद्याविद्येतिहासानामाक्ष्यानपरिकल्पनम्।
विनोदकरणं लोके नाट्यमेतद् भविष्यति॥
श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनम्।
विनोदजननं लोके नाट्यमेतद् भविष्यति॥
दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं लोके नाट्यमेतद् भविष्यति॥

इदं नाट्यं शूरवीराणां ह्दयेउत्साहवर्धनम् करोति, शक्तिहीनानां ह्दये शक्ते: सन्चरणं, अज्ञानानाड्कृते ज्ञानं च प्रयच्छति। तथा विद्वत्सु विद्वत्ताया:

उत्कर्षं जनयति।
नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्॥

सप्तद्वीपभावानुकीर्तनरूपे नाट्ये दृश्यमाने यन्न दृश्यते न ह्दयगोचरमिति तादृग् ज्ञानादिकं नास्तीति शेष:।यो नाट्ये चित्रितं –

न तत्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येस्मिन् यन्न दृश्यते॥

अस्मिन् नाट्ये सर्वा: विद्या: सन्ति, सर्वा: कला: विद्यन्ते, सर्वं ज्ञानं, सर्वं शिल्पपस्ति। तात्पर्यात् यत्किमपि वस्तु जातमस्ति, तत्सर्वमपि नाट्ये

उपलब्धमस्ति। यथा –
योयं स्वभावो लोकस्य सुखदु: खसमन्वित:।
सोंऽगाद्यभिनयोपेतो नाट्यमित्यभिधीयते॥

नाट्ये क्षकल्पानुव्यवसायिविषयो भवति। सर्वस्य लोकस्य साधारणतया स्वत्वेन भाव्यमा नश्चर्व्यमाणोर्थो हि नाट्यं भवति। तदेव नाट्यादिरूपकोपक्रमंगीतातोद्य:प्राणाभिनयवर्गपरिपुष्यद्रसचर्वणात्मकं परप्रीतिमयमेव नाट्यम् सर्वं भवति।

आचार्य धनन्जयमतम् –भरतानन्तरं नाट्यपरम्परायां घनन्जयस्य क्रम:समागच्छति। तत्रायं लिखति यत् नाट्यानां लक्षणं संक्षिपामि इत्युक्तं किं पुनस्तन्नाट्यमित्याह – अवस्थानुकृतिर्नाट्यम्। रूपकम् तत्समारोपात्।

काव्योपनिबद्धधीरोदात्ताद्यवस्थनुकारश्चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम्। नाट्यानां लक्षणमिदं सामान्यं विशेषस्तु वक्ष्यति। रामादिनायकानाम् अवस्थाधीरोदात्तत्वादयो दक्षिणादयश्चम। तासां नटेन यदनुकरणं नटेन प्रेक्षकबुद्ध्या रामादितादात्म्यापत्ति: तन्नाट्यमिति अभिधीयते। सागरनन्दिमते – नाटक्लक्षणरत्नकोशे सागरनन्दिना नाटयस्य यल्लक्षणं निगदितम् तदेवम् –

धर्मादिसाधनं नाट्यं सर्वदु:खपनोदकृत । नाट्यमिदं पुरूषार्थचतुष्टयस्य साधनभूतमस्ति । येन लौकिकदु:खानां नाशो भवतीति । शारदातनयमतम् – नाट्यपरम्परायां शारदातनयोपि महान् आचार्योस्ति। अनेन स्वस्य भावप्रकाशने नाट्यस्य युक्तियुक्तं लक्षणमुक्तम् । तद्यथा –

अवस्थानुकृतिर्नाटयमिति सामान्यलक्षणम्
रामादितादात्म्यापत्तिर्नटे या नाट्यमुच्यते ।।

शारदातनयेनापि दशरूपकवत् स्वस्य नाट्यलक्षणं निगदितम् । अयं ब्रवीति यदवस्थाया: अनुकरणमेव नाट्यमिति यथा नटे रामादीनां तादात्म्यापत्तिर्भवति तदेव नाट्यमुच्यते ।

शिड्गभूपालमतम् – शारदातनयानन्तरं शिड्गभूपालस्य क्रम: समायाति। अनेनापि अनेनापि सयुक्तिकं नाट्यलक्षणं प्रतिपादितम् –

सात्विकाद्यैरभिनयै: प्रेक्षकाणां यतो भवेत् ।
नटे नायकतादात्म्यबुद्धिस्तन्नाट्यमुच्यते ।

अत: सात्विकादिभिरभिनयै: दर्शकाणां यस्मिन्नटेनायकविषयकतादात्म्यापत्तिर्भवति तन्नाट्यमित्यभिधीयते नाट्यमिति कथ्यते। आचार्य केशवमिश्रोपि एवमेव वदति अलंकारशेखरे । काव्यप्रयोजन प्रतिपादने एवं च नायकत्व वर्णने उपरि कथितानां नाट्यन्दर्भे विविध विषयाणां सारभूतंसंकलनं अलंकारशेखरेप्राप्यते ।

उपसंहार:-

कथने किमपि संकोचस्यानुभव: नास्ति यत् महाभारतादि विषये कथितमस्ति – यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् इत्यादि इत्यपि तु नाट्ये वर्तमान:। षोडश शताब्दे अलंकारशेखरे नायकनायिका वर्णने नाटयसम्बन्धि सांगोपांग विषयाणां चिन्ता दृश्यते नाट्यमेतत् सामाजिकेभ्यो धर्मं, यशस्यमायुष्यं, हितं बुद्धि विवर्धनं लोकोपदेशजननं च प्रयच्छति। नाट्यमिदं दु:खार्तानां श्रमार्तानां तपस्विनां कृतेपि महदुपकारकम् अस्ति। यतो हि चत्वारो वेदा:, द्विजमात्रोपयोगिन: उपादेययुक्ताश्चम सन्ति। नाट्येस्मिन् सर्वजन-हितायसर्वजनसुखायच भावना निहितास्ति । काव्यप्रयोजन वर्णने – लाभ: पूजा ख्यातिर्धम: कामश्च मोक्षश्च , इष्टानिष्ट प्राप्तित्यागौ ज्ञानं फलानि काव्यस्य इति कथने केशवमिश्रेण नाट्यप्रयोजनमपि समर्थितं ।।